अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 204**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**

**एम.ए. संस्कृतम्, (सत्रम् : द्वितीयम)**
**काव्य काव्यशास्त्र च**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

**खण्ड–क**
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः 'क'** खण्डे चतुर्दीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय द्वादशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु चत्वारः प्रश्नाः एव समाधेयाः। **(4×12=48)**

**1.** अधोलिखितेषु गद्येषु काचिद् गद्यद्वयी सप्रसङ्गं व्याख्येया – (6+6=12)

(क) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्व-ममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थ – परम्परा सर्वा, अविनयानामेकैकमप्येषा – मायतनम्, किमुत समवायः। यावनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्य-मुणयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्ति-रतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः।

(ख) आलोकयतु तावत् कल्याणाभिनिवेशिनी लक्ष्मीमेव प्रथमम्। इयं हि खड्गमण्डलोत्पलवनविश्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम् कौस्तुभमणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वैवोद्गता।

(ग) ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते, मदनशरैर्ममाहता इव मुखभङ्गसहस्त्राणि कुर्वते, धनोष्मणा पच्यमाना इव विचेष्टन्ते गाढप्रहाराहता इवाङ्गानि न धारयन्ति, कुलीरा इव तिर्यक् परिभ्रमन्ति, अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्यन्ते।

**2.** अधोलिखितेषु पद्येषु कयोश्चिद् द्वयो रसालङ्कारादिनिर्देशपूर्वकं सप्रसङ्गा व्याख्या कार्या। (6+6=12)

(क) सञ्चिन्वाना तरुणतुलसीदामभिस्स्वामभिख्यां
तस्यां वेद्यामनुविदधती शीतलं हव्यवाहम्।
भोगैश्वर्यप्रियसहचरैः कापि लक्ष्मीकाटाक्षैः
भूयः श्यामा भुवनजननी देवता सन्निधत्ते।।

(ख) जातप्रीतिर्जनपदमथो मध्यमं लङ्घयित्वा
दूराल्लक्ष्यक्रमुकनिवहश्यामलान्याहि चोलान्।
प्रत्युद्गच्छन्मकरवलनस्तम्भितैस्सह्यजायाः
स्रोतोभेदैर्विविधगतिभिः संविभक्तावकाशान्।।

(ग) मुक्ताजालैर्जनितपुलिनां शुक्तिसन्तानमुक्तैः
तारापूर्णां दिवमिव ततस्ताम्रपर्णीं भजथाः।
प्रत्यासत्त्या नियतविशदं पीतसिन्धोर्महर्षेः
पानीयन्ते परिणमयिता तत्र मुक्तामयत्वम्।।

3. आचार्यमम्मटोक्तं काव्यलक्षणं प्रतिपाद्य तस्य आचार्यविश्वनाथमतेन समीक्षा कार्या 12

***अथवा***

आचार्यविश्वनाथमतेन वाक्यस्वरूपं सोदाहरणं प्रतिपादयत।

4. लक्षणाशक्त्याः स्वरूपं सभेदोदाहरणं प्रतिपादयत। 12

***अथवा***

आर्थीव्यञ्जनायाः स्वरूपं सोदाहरणं लिखत।

## खण्ड–ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे पञ्चलघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल त्रयः एव प्रश्नाः समाधेयाः। **(3×5=15)**

1. शुकनासोपदेशस्य सारः स्वशब्दैर्लेखनीयः।
2. शुकनासोक्तं लक्ष्मीस्वरूपं स्वशब्दैः वर्णयत।
3. हंससन्देशस्य प्रथमाश्वासस्य कथा लेखनीया।
4. हंससन्देशस्य काव्यमाहात्म्यं प्रतिपादयत।
5. अधोलिखितयोः काचित् कारिकैका व्याख्येया –

(क) चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।

(ख) मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।

## खण्ड–ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे सप्तलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय एकङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(07×01=07)**

1. यौवनारम्भे किं कालुष्यमुपयाति?
   (अ) शरीरम् (ब) बुद्धिः
   (स) वाणी (द) आत्मा
2. "राहुजिह्वा" अत्र को नाम समासः?
   (अ) बहुब्रीहिः (ब) द्वन्द्वः
   (स) तत्पुरुषः (द) अव्ययीभावः
3. हंससन्देशे सन्देशदातुर्नामास्ति?
   (अ) रामः (ब) नलः
   (स) यक्षः (द) युधिष्ठिरः
4. हंससन्देशः कस्य रचनास्ति?
   (अ) कालिदासस्य (ब) हर्षवर्धनस्य
   (स) श्रीभट्टनारायणस्य (द) श्रीवेङ्कटनाथस्य
5. "वक्रोक्तिः काव्यजीवितम्" इत्युक्तिः कस्यास्ति?
   (अ) आचार्यमम्मटस्य (ब) आचार्यविश्वनाथस्य
   (स) आचार्यकुन्तकस्य (द) आचार्यभामहस्य

6. "कलिङ्गः साहसिकः" इत्यत्र कालिङ्गदेशवासिनः पुरुषाः साहसिनः" अयमर्थः कया शक्त्या बोध्यते?

(अ) अभिधया | (ब) लक्षणया
(स) व्यञ्जनया | (द) उत्प्रेक्षया

7. "काव्यालापाश्च ..................................... विष्णोरंशा महात्मनः" इत्युक्तम् ।

(अ) विष्णुपुराणे | (ब) श्रीमद्भागवतपुराणे
(स) गरुडपुराणे | (द) शिवपुराणे

---------------x---------------